दिनाङ्क: 03.03.2026

प्रात: - 06:55

<u>प्रधानमन्त्री मोदी-पश्चिम एशिया</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना दूरभाषया वार्तालापकाले सौदी अरेबिया-देशस्य युवराजेन मोहम्मद् बिन् सल्मान् इत्यनेन सह पश्चिम-एशियायाः विकसिता स्थितिः चर्चिता। श्रीमोदी सौदी अरेबिया-देशस्य उपरि सद्यः एव कृतानां आक्रमणानां निन्दाम् अकरोत्, तेषां सार्वभौमत्वस्य क्षेत्रीय-अखण्डतायाः च उल्लङ्घनमिति वर्णितवान्। अस्मिन् दुष्करकाले भारतीयसमुदायस्य सहयोगाय सलमान्-महोदयाय प्रधानमन्त्री धन्यवादम् अददात्। बहरीन्-देशस्य राजा हमद् बिन् इसा अल् खलीफा इत्यनेन सह अपि श्रीमोदी दूरभाषद्वारा वार्तालापम् अकरोत्। प्रधानमन्त्री जोर्डान्-देशस्य राज्ञया अब्दुल्ला-द्वितीयेन सह अपि वार्तालापं कृत्वा अस्मिन् क्षेत्रे विकसितां स्थितिं प्रति गभीरं चिन्तां प्रकटितवान्। सामाजिक-माध्यमे श्रीमोदी उक्तवान् यत् अस्मिन् दुष्करसमये जोर्डन-देशे भारतीयसमुदायस्य परिचर्यायै सः राजानं धन्यवादान् व्यहरतीति।

<u>ट्रम्प-इरानः</u>

यू.एस. राष्ट्रपतिना डोनाल्ड् ट्रम्प इत्यनेन ईरान-देशे यू. एस. स्थलसेनायाः नियुक्तिः निराकृता। एकया वार्ता-वाहिन्या सह वार्तालापं कुर्वन् श्रीट्रम्पः अवदत् यत् यदि आवश्यकं भविष्यति तर्हि विषयेऽस्मिन् विचारं करिष्यते इति। श्री ट्रम्पः अवदत् यत् पूर्वराष्ट्रपतिभिः विपरीतम्, सः ईरान्-देशे सैनिकान् स्थापयितुं स्पष्टतया निराकरिष्यतीति। तस्मिन् एव साक्षात्कारे, श्रीट्रम्पः अवदत् यत् अभियानं नेतृत्वदृष्ट्या नियतसमयात् पूर्वमेव आसीदिति।

<u>प्राणहानिः - पश्चिम एशिया युद्धे</u>

इस्रायल-देशस्य वायुदलेनोक्तम् यत् तैः अमेरिकादेशेन सह संयुज्य इरान-देशस्य एकत्रिंशत् क्षेत्रेषु द्वादशशततोऽधिकानि युद्धोपकरणानि निक्षिप्तानीति। इरान्-देशश्च बहरीन्, इराक्, जोर्डन्, कुवैत, ओमान, कतर, सौदी अरेबिया, युनैटेड अरब अमिरात्स इत्यादिषु नवदेशेषु आक्रमणं प्रारब्धवान्। रेड्-क्रीसेण्ट् इत्यस्य मतेन, इरान्-देशे अमेरिका-इस्रायल्-देशयोः संयुक्त-आक्रमणेन सार्धपञ्चशततोऽधिकाः जनाः मृताः। मिनाब्-नगरस्य बालिका-प्राथमिकविद्यालये प्राणघातकः प्रहारः अभवत्, येन प्रायः पादोनद्विशताधिकाः बालाः मृताः। एतन्मध्ये बाङ्ग्लादेश्-देशस्य विदेशमन्त्रालयः अवदत् यत् मिसाइल-ड्रोन-आक्रमणेषु द्वौ बाङ्ग्लादेशी-जनावपि मृतौ, सप्त जनाश्च व्रणिताः सन्तीति।

नागरिक उड्डयन-भारतः

नागरिक-विमानयान-मन्त्रालयः अवदत् यत् इण्डिगो-संस्थया अद्य जेद्दाह-नगरात् भारतं प्रति दश- विशेष-आश्वस्ति-कार्याणि योजितानि सन्ति, येन अपेक्षित-अनुमोदनानां विद्यमान-वायुक्षेत्र-स्थित्याः च अधीनं विलम्बितानां यात्रिकाणां पुनरागमनं सुकरं भवेत्। एकस्मिन् वक्तव्ये, मन्त्रालयः अवदत् यत् इण्डिगो-संस्था यात्रिकाणां सौकर्यार्थं जेद्दा-नगरे भारतस्य वाणिज्यदूतावासेन सह समन्वयं कुर्वती अस्तीति।

विमानयान-उड्डयन-निरस्तम्

पश्चिम-एशियादेशे वर्तमानस्थितौ नागरिक-विमानयान-मन्त्रालयः अवदत् यत् परिचालनार्थं नियोजितानि सार्धत्रिशताधिकानि विमानयानानि निरस्तानीति। सामाजिक-माध्यमे मन्त्रालयः सूचितवान् यत् यात्रिकाणां उपशमनार्थं क्षेत्रस्य स्थितिं निकटतया निरीक्ष्यते इति। विमानयानसेवायाः निरस्तीकरणस्य पुनर्निर्धारणस्य च विषये यथार्थ-स्थित्यै अधिकृत-विमानयान-वाहिन्यः पश्यन्तु इति अपि मन्त्रालयः यात्रिकान् सूचितवान्।

पीएम-वेबिनारः

प्रधानमन्त्री नरेन्द्रमोदी अद्य 'आर्थिकवृद्धेः सुस्थिरतायाः सुदृढीकरणम्' इति विषये वेबिनाराख्यं आभासीयसम्मेलनं सम्बोधयिष्यति। प्रधानमन्त्री-कार्यालयेन सूचितं यत्, आयव्ययोत्तर-सत्रेऽस्मिन् औद्योगिक-स्तरस्य विस्ताराय, प्रौद्योगिकीय-नेतृत्वम् गहनं कर्तुं, महत्त्वपूर्णक्षेत्राणां आधारान् सुदृढं कर्तुं च दूरदर्शीय-परिष्कार-प्रोत्साहनं प्रकाशयिष्यते इति।

बैडमिण्टन्-क्रीडा

बैडमिण्टन्-क्रीडायां, अद्य बर्मिंघम्-नगरे अस्य वर्षस्य अखिल-इङ्ग्लेण्ड्-बैडमिण्टन्-च्याम्पियन्शिप इति क्रीडायां भारतं स्वस्य अभियानस्य आरम्भं करिष्यति, यत्र पञ्चप्रवर्गेभ्यः द्वादशसदस्याः प्रातिभाग्यं करिष्यन्ति।

।। इति वार्ताः।।